16. अर्जुन is end-acute, if it is the name of straw. This is an exception to Phiṭ II. 9. Why do we say 'when it is the name of straw'? Observe अर्जुनः वृक्षः where it is first-acute by Phiṭ. II. 9.

१७ । अर्यस्य स्वाम्याख्या चेत् ॥

'यान्तस्यान्त्यात्पूर्वम्' इति 'यतोऽनावः' (३७०१) इति वाद्युदात्ते प्राप्ते वचनम् ॥

17. अर्य is end-acute, when it means 'master.' Otherwise it is first-acute by Phiṭ III. 3 or Páṇini VI. 1. 213 S. 3701. See also Páṇini III. 1. 103. for the word अर्य and its vártika.

१८ । आशाया अदिगाख्या चेत् ॥

दिगाख्याव्यावृत्त्यर्थमिदम् । अत एव ज्ञापकाद्दिगाख्यायामाद्युदात्तता । 'इन्द्र आशाभ्यस्परि' ॥

18. आशा is end-acute, if it is not the name of a direction. This implies that when आशा means 'direction' then it is first-acute. As इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून् विचर्षणिः । (Rig. II. 41. 12). 'May the wise Indra, conqueror of enemies, make us free from fear from all directions or sides.' Here आशा means direction.

१९ । नक्षत्राणामाब्विषयाणाम् ॥

अन्त उदात्तः स्यात् । आश्लेषानुराधादीनां 'लघावन्ते-' इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् ॥

19. The names of Asterisms, which take the feminine affix आ, are end-acute. The asterisms अश्लेषा, अनुराधा, &c. would have been otherwise governed by Phiṭ II. 19: while ज्येष्ठा, श्रविष्ठा, धनिष्ठा, being formed by इष्ठन्, would have been first-acute by नित् accent.

२० । न कुपूर्वस्य कृत्तिकाख्या चेत् ॥

अन्त उदात्तो न । कृत्तिका नक्षत्रम् । केचित्तु कुपूर्वो य आप्प्रत्ययस्तदन्तस्यापीति व्याख्याय 'आर्यिका' 'बहुलिका' इत्यत्राप्यन्तोदात्तो नेत्याहुः ॥

20. Not so, if the final letter is का and the asterism is the name of Kṛittikâ. The final of कृत्तिका is not acute; it is first-acute by Phiṭ II. 19. As कृत्तिका नक्षत्रम् । Others hold that the words ending in का in the feminine are not end-acute; and they mention आर्यिका, बहुलिका ॥

२१ । घृतादीनां च ॥

अन्त उदात्तः । 'घृतं मिमिक्षे' आकृतिगणोऽयम् ॥

21. घृत and the rest are end-acute. As घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम, (Rig. II. 3. 11). 'I sprinkle ghee on fire, ghee is its birth-place, ghee is its abode of rest, and ghee its luminosity &c.' This is an Akṛitigaṇa: all words which are end-acute, and do not fall under any other rule, should be classified under the Ghṛitâdi class.

२२ । ज्येष्ठकनिष्ठयोर्वयसि ॥

अन्त उदात्तः स्यात् । 'ज्येष्ठ आह चमसा' । 'कनिष्ठ आह चतुरः' । 'वयसि' किम् । ज्येष्ठः श्रेष्ठः । कनिष्ठोऽल्पिष्ठः । इह नित्स्वरादाद्युदात्त एव ॥

22. ज्येष्ठ and कनिष्ठ are end-acute when meaning 'age—oldest and youngest.' As ज्येष्ठ आह चमसा द्वा करेति कनीयान् त्रीन् कृणवामेत्याह । कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत् पनयद् वचो वः । (Rig. IV. 33. 5) । Here ज्येष्ठ means the 'eldest,' and refers to Ṛibhu, कनीयान् refers to his *younger* brother Bibhvâ, and कनिष्ठ refers to the youngest brother Vâja. ज्य in ज्येष्ठ here is the substitute of वृद्ध (V. 3. 62) and कन् for युवन् in कनिष्ठः by V. 3. 64. Why do we say 'when meaning age'? Observe ज्येष्ठ = श्रेष्ठ derived from प्रशस्य (V. 3. 61), and कनिष्ठ from अल्प (V. 3. 64) = अल्पिष्ठः । These are first-acute by नित् accent. The present sûtra is thus an exception to नित् accent.

२३ । बिल्वतिष्ययोः स्वरितो वा ॥

अनयोरन्तः स्वरितो वा स्यात् । पक्ष उदात्तः ॥

इति फिट्सूत्रेषु प्रथमः पादः ॥

23. The finals of बिल्व and तिष्य are optionally svarita. In the other alternative they will be acute. As बिल्व or बिल्व, तिष्य or तिष्य ॥

---

## CHAPTER II.

१ । अथादिः प्राक् शकटेः ॥

अधिकारोऽयम् । 'शकटिशकट्योः–' इति यावत् ॥

1. From this up to the end of Chapter III, the word आदि exerts the governing influence. From this sútra up to शकटिशकट्य (IV. 1) exclusive, the accent is on the first syllable of the words taught.

२ । ह्रस्वान्तस्य स्त्रीविषयस्य ॥

आद्युदात्तः स्यात् । बलिः । तनुः ॥

2. A word ending in a light vowel, and used always in the feminine, is first-acute. As बलिः, तनुः ॥

३ । नब्विषयस्यानिसन्तस्य ॥

'वने न वा यः' । इसन्तस्य तु सर्पिः । नपुंसकम् ॥

3. An invariable neuter noun, with the exception of one ending in इस्, is first-acute. The word नप् means नपुंसक or Neuter. As वने न वायः (Rig Veda X. 29. 1). But सर्पिस्, ज्योतिस्, अर्चिस् &c. ending in इस् are end-acute.

४ । तृणधान्यानां च द्व्यषाम् ॥

द्व्यचामित्यर्थः । कुशाः । काशाः । माषाः । तिलाः । बहुचां तु गोधूमाः ॥

4. Words denoting 'straw' and 'grain' are first-acute when consisting of two syllables. The word द्व्यष् = द्व्यच् । As कुशाः, काशाः, माषाः, तिलाः । But गोधूमाः is acute on the middle by Phit II. 19. The word अष् is the Name given to vowels by Ancient Grammarians.

५ । ञ्रः संख्यायाः ॥

पञ्च । चत्वारः ॥

5. A Numeral ending in न् or र् is first-acute. As पञ्च, चत्वारः । In चत्वारः the word is middle-acute by आम accent; see Pâṇini VII. 1. 98. The proper example is चतुष्कपालः । For चतुरः is end acute by VI. 1. 167, चतुर्भिः is middle-acute by VI. 1. 180. चतुर्णाम् is governed by VI. 1. 179. Hence example of a compound ; which is first acute by VI. 2. 29.

६ । स्वाङ्गशिटामदन्तानाम् ॥

शिट् सर्वनाम । 'कर्णाभ्यां छुबुकादधि' । 'ओष्ठाविव मधु' । 'विश्वो विहायाः' ॥

6. The words denoting bodily organs and ending in अ, as well as the Pronouns are first-acute. The शिट् is the name given to Pronouns (सर्वनाम) by ancient Grammarians. As कर्णाभ्यां छुबुकादधि, (Rig Veda X. 163. 1) ; ओष्ठाविव मधु, (Rig Veda II. 39. 6) विश्वो विहायाः (Rig Veda I. 28. 6).

७ । प्राणिनां कुपूर्वम् ॥

कवर्गात्पूर्वं आद्युदात्तः । काकः । वृकः । 'शुकेषु मे' । प्राणिनाम् किम् ? क्षीरं सर्पिर्मधूदकम् ॥

7. The syllable preceding the क is acute in the names of animate beings. Thus काकः, वृकः, शुकेषु मे (Rig Veda I. 50. 12). Why do we say 'of living beings'? Observe क्षीरं सर्पिर्मधूदकम् । (Rig Veda IX. 67. 32). Here उदक is end-acute by Phit II. 14.

८ । खय्युवर्णं कृत्रिमाख्या चेत् ॥

खयि परे उवर्णमुदात्तं स्यात् । कन्दुकः ॥

8. The उ preceding a खय् (the surd letter) is acute, when the word is the name of an artificial thing. As कन्दुकः ॥

९ । उनर्वन्नन्तानाम् ॥

उन । 'वरुणं वो रिशादसम्' । ऋ । 'स्वसारं त्वा कृणवै' । वन् । 'पीवानं मेषम्' ॥

9. *The words ending in* उन, ऋ, *and* वन् *are first acute.* As उन:—वरुणं वो रिशा दसम् (Rig Veda V. 64. 1). ऋ—स्वसारं त्वा कृणवै (Rig Veda X. 108. 9). वन्- पीवानं मेषम् (Rig Veda X. 27. 17).

१० । वर्णानां तणतिनितान्तानाम् ॥

आदिरुदात्तः । एतः । हरिणः । शितिः । पृश्निः । हरित् ॥

10. Words denoting color are first-acute, when they end in त, ण, ति, नि and त् । Thus एतः, हरिणः, शितिः, पृश्निः, हरित् ॥

११ । ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये ॥

ऋदुवर्जं ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः ॥

11. The initial short vowel is udátta when the word ends with a short vowel, and denotes 'habit': but not so when the initial vowel is short ऋ । As मुनिः । But not so in ऋषभः ॥

१२ । अक्षस्यादेवनस्य ॥

आदिरुदात्तः । 'तस्य नाक्षः' । देवने तु । 'अक्षैर्मा दीव्यः' ॥

12. The word अक्ष is first-acute, when not meaning 'to gamble.' As तस्य नाक्षः (Rig Veda I. 164. 13). But when it means देवन् or play, we have अक्षैर्मा दीव्य । (Rig Veda X. 34. 13).

१३ । अर्धस्यासमद्योतने ॥

अर्धो ग्रामस्य । समेंऽशके तु अर्धं पिप्पल्याः ॥

13. The word अर्ध is first-acute when meaning 'not equal.' As अर्धो ग्रामस्य. But when it denotes *equal* portions, *i. e.* when it means 'half', we have अर्धं पिप्पल्याः ॥

१४ । पीतद्वर्थानाम् ॥

आदिरुदात्तः । पीतद्रुः । सरलः ॥

14. The words denoting पीतद्रु or yellow-trees are first-acute. As पीतद्रुः । सरलः ॥

१५ । ग्रामादीनां च ॥

ग्रामः । सोमः । यामः ॥

15. The words ग्राम and the rest are first-acute. As ग्रामः, सोमः, यामः ॥

१६ । लुबन्तस्योपमेयनामधेयस्य ॥

चञ्चेव चञ्चा । 'स्थानान्तस्य' इति पाठान्तरम् । स्थानमिति कुशः [illegible] संज्ञा ॥

16. The words ending in a लुप् elided-affix denoting the name of the thing compared are first-acute. Another reading is विभक्तलोपस्य । The विभक्त is the name given by Eastern Grammarians to लुप् elision. Thus चञ्चा in which the affix कन् (V. 3. 96) is elided by V. 3. 98. Why do we say 'a लुप् ending word'? Observe अग्निमाणवकः ॥

१७ । न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम् ॥

एषामुपमेयवाचिनामाद्युदात्तत्वं न । ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः ॥

17. The words denoting trees and mountains, and the words व्याघ्र, सिंह and महिष are not first-acute when objects of comparison. The word विशेष qualifies वृक्ष and पर्वत, and means *species* of trees and mountains, and not the word-forms वृक्ष and पर्वत । व्याघ्र &c., are word-forms. Thus ताल इव तालः, मेरुरिव मेरुः, व्याघ्रः, सिंहः, महिषः । But when we have वृक्ष इवायं वृक्षः, पर्वत इवायं पर्वतः, then these two words would be first-acute by the preceding sûtra.

१८ । राजविशेषस्य यमन्वा चेत् ॥

यमन्वा वृद्धः । आङ्गा उदाहरणम् । अङ्गाः प्रत्युदाहरणम् ॥

18. The name of any particular kingdom, ending with a लुप् elided comparative affix, is first-acute, provided that the word has a Vṛiddhi letter in its first syllable. The word यमन्वा = वृद्ध । Thus आङ्गाः, but अङ्गाः is counter-example, because it is not a Vṛiddham.

१९ । लघावन्ते द्वयोश्च बह्वषो गुरुः ॥

अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वच्कस्य गुरुरुदात्तः । कल्याणः । कोलाहलः ॥

19. A word whose final syllable is light, or a polysyllabic word whose two syllables are light, gets the acute on the heavy syllable, wherever that may be. Thus कल्याणः or कल्याणः; कोलाहलः or कोलाहलः ॥

२० । स्त्रीविषयवर्णाक्षुपूर्वाणाम् ॥

एषामाद्युदात्तः । स्त्रीविषयम् । मल्लिका । वर्णः । श्येनी । हरिणी । अक्षुशब्दोऽ-वयवपूर्वाणां च अक्षुपूर्वाः । तरक्षुः ॥

20. The words which are invariably feminine, the words denoting color and words standing before the word अक्षु are first-acute. Feminine words; as—मल्लिका; denoting color, as—श्येनी, हरिणी; followed by अक्षु as—तरक्षुः ॥

२१ । शकुनीनां च लघु पूर्वम् ॥

पूर्वं लघु उदात्तं स्यात् । कुक्कुटः । तित्तिरिः ॥

21. The words denoting birds have the acute on the light syllable preceding the final. Thus कुक्कुटः, तित्तिरिः ॥

२२ । नर्तुप्राण्याख्यायाम् ॥

यथालक्षणं प्राप्तमुदात्तत्वं न । वसन्तः । कृकलासः ॥

22. The rules relating to acute accent mentioned, however, do not apply to the names of seasons and animals. As वसन्तः । कृकलासः ॥

२३ । धान्यानां च वृद्धक्षान्तानाम् ॥

आदिरुदात्तः । कान्तानाम् । श्यामाकाः । षान्तानाम् । राजमाषाः ॥

23. The words denoting the names of corns, and having a Vṛiddhi vowel in their first syllable and ending with a क or a ष, are first-acute. Thus श्यामाकाः, राजमाषाः ending in क and ष respectively. These are names of corns. These are the examples given by the author of the Siddhânta Kaumudi. श्यामाकाः is however governed by *Phiṭ III. 18. नैवारकाः would be a better example. According to another recension, the word* च *does not occur in the sûtra. In the Phit-vṛitti* the sûtra is explained as meaning 'The heavy vowel of words denoting corn is acute, &c.' Thus the accent may be नै॑वारकाः or नैवा॑रकाः, कौ॑लत्थाः or कौल॑त्थाः ॥

२४ । जनपदशब्दानामषान्तानाम् ॥

आदिरुदात्तः । केकयः ॥

24. The words denoting countries and ending in a vowel, are first-acute. As के॑कयः । According to some, the accent of this word is governed by Phiṭ II. 13 Their examples are आ॑ङ्गाः, व॑ङ्गाः ॥

२५ । हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा ॥

हयिति हल्संज्ञा । पललम् । शललम् । 'हयादीनाम्' किम् ? एकलः । 'असंयुक्त–' इति किम् ? मल्लः ॥

25. A word beginning with a consonant, and ending with the letter ल, not being a conjunct consonant, has acute on the first syllable, or optionally on the penultimate syllable. Thus प॑ललम् or पल॑लम्, शल॑लम्, or श॑ललम् । The word हय् in the sûtra is equivalent to हल् । Why do we say 'beginning with a हल्'? Observe एकलः । Why do we say 'a non–conjunct ल' ? See मल्लः । Some read the anuvṛitti of the word जनपदानां into this sûtra. They give the examples पञ्चालाः, कोशलाः, and the counter-example पलालम् ॥

२६ । इगन्तानां च द्व्यषाम् ॥

आदिरुदात्तः । कृषिः ॥

इति फिट्सूत्रेषु द्वितीय पादः ॥

26. A word ending in इ, उ, ऋ or लृ long or short, is first-acute, when it consists of two syllables. Thus कृ॑षिः । Some read the anuvṛitti of the word जनपदानाम् into this sûtra: and so their examples are कु॑रवः and चेदयः (कुरु and चेदि), and their counter-example is कृषि॑ । Because कृषिः is found to be end-acute in अक्षै र्मा दीव्यः कृषिमित्कृषस्व (Rig Veda X. 34. 13).

## CHAPTER III.

१ । अथ द्वितीयं प्रागीषात् ॥

'ईषान्तस्य हयादेः–' इत्यतः प्राग्द्वितीयाधिकारः ॥

1. Up to ईषान्तस्य &c, (III. 17) exclusive, the words 'second syllable' have governing force. In all rules up to sûtra 16 inclusive of this Chapter, the words 'second syllable' should be supplied.

२ । त्र्यचां प्राङ्मकरात् ॥

'मकरवरुड–' इत्यतः प्राक् त्र्यचामित्यधिकारः ॥

2. 'Of a word consisting of three syllables' is the phrase to be supplied in the following sûtras up to मकर &c. Sûtra 8.

३ । स्वाङ्गानामकुर्वादीनाम् ॥

कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम् । ललाटम् । कुर्वादीनां तु कपोलः । रसना । वदनम् ॥

3. Words consisting of three syllables and denoting limbs (or bodily organs) get the acute on their second syllable, provided that they do not begin with a guttural, a र or a व । As ललाटम् । But the guttural-beginning कपोलः is middle acute by Phiṭ II. 19 and रसना and वदनं are first-acute by Phiṭ II. 6.

४ । मादीनां च ॥

मलयः । मकरः ॥

4. A trisyllabic word beginning with म has acute on the second syllable; As मलयः । मकरः । मकुन्दः ॥

५ । शादीनां शाकानाम् ॥

शीतन्या । शतपुष्पा ॥

5. A tri-syllabic word beginning with श and denoting vegetables, has acute on the second. As शीतन्या । शतपुष्पा । Some read the sútra as सादीनाम् and illustrate it by सर्षपा ॥

६ । पान्तानां गुर्वादीनाम् ॥

पादपः । आतपः । लघ्वादीनां तु । अनूपम् । द्व्यचां तु । नीपम् ॥

6. A tri-syllabic word ending in प and beginning with a heavy syllable has acute on the second. As पादपः, आतपः । But अनूपम् (VI. 2. 189), because the first-syllable is light: and नीपम् (VI. 2. 192), because the word consists of two syllables.

७ । युतान्यण्यन्तानाम् ॥

युते । अयुतम् । अनि । धमनिः । अणि । विपणि ॥

7. A tri-syllabic word ending in युत, अनि and अणि has acute on the second. As अयुतम्, धमनिः, विपणी ॥

८ । मकरवरुडपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा ॥

एषामादिर्द्वितीयो वोदात्तः । मकरः । वरुड इत्यादि ॥

8. Either the first or the second syllable of these may have the acute: मकर (or मकर), वरुड (or वरुड), पारेवत (or पारेवत), वितस्त (or वितस्त), इक्षु (or इक्षु), आर्जि (or आर्जि), द्राक्षा (or द्राक्षा), कला (or कला), उमा (or उमा), काष्ठा (or काष्ठा), पेष्ठा (or पेष्ठा), काशी (or काशी) ॥

९ । छन्दसि च ॥

अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयं चोदात्तं ज्ञेयम् ॥

9. In the Chhandas, several other words than मकर &c., have acute either on the first or on the second.

१० । कर्दमादीनां च ॥

आदिर्द्वितीयं वोदात्तम् ॥

10. The words कर्दम &c., have acute either on the first or on the second. As क॑र्दम (or कर्द॑म), कु॑लटा (or कुल॑टा), उ॑दकः or उद॑कः, गा॑न्धारिः or गान्धा॑रिः ॥

११ । सुगन्धितेजनस्य ते वा ॥

आदिर्द्वितीयं तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः । सुगन्धितेजनाः ॥

11. The first, second or the fourth syllable of सुगन्धितेजन may get the acute-accent. ते means the syllable ते of this word. Thus सु॑गन्धितेजनाः or सुग॑न्धितेजनाः or सुगन्धिते॑जनाः ॥

१२ । नपः फलान्तानाम् ॥

आदिर्द्वितीयं वोदात्तम् । राजादनफलम् ॥

12. Of a neuter noun ending in फल, the first or the second syllable may be acute. The word नप् means नपुंसक or Neuter. Thus रा॑जादनफलम् or राजा॑दनफलम् ॥

१३ । यान्तस्यान्त्यात्पूर्वम् ॥

कुलायः ॥

13. A word ending in य has acute on the syllable preceding such य। As कुला॑यः ॥

१४ । थान्तस्य च नालघुनी ॥

नाशब्दो लघु च उदात्ते स्तः । सनाथा सभा ॥

14. A word-ending in थ has acute on the syllable ना (if any) and on the light syllable that may immediately precede it. As स॑ना॑था सभा । Others read this sûtra as धान्तस्य च ना लघुनी 'a word ending in धा and having ना or a light syllable preceding such धा has acute on such ना and the light vowel.' They give examples of मे॑धा, वि॑धा, सु॑धा ॥

१५ । शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च ॥

अन्त्यात्पूर्वमुदात्तं द्वितीयं वा ॥

15. The following words have acute either on the penultimate or the second syllable :—शिशुमा॑रः (or शिशु॑मारः or शिंशु॑मारः or शिंशुमा॑रः), उदु॑म्बरः (or उदुम्ब॑रः), बलीव॑र्दः (or बली॑वर्दः), उष्ट्रा॑रः (another reading is उष्टा॑रः), पुरू॑रवस् (or पुरूर॑वस्).

१६ । सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् ॥

द्वितीयमुदात्तं वा ॥

16. The second syllables of the following are optionally acute. सां॑काश्यः (formed by ण्य of IV. 2. 80); so also काम्पिल्यः, नासिक्यः, and दार्वाघाटः । See Vârtika दारावाहन under III. 2. 49, S. 2966.

१७ । ईषान्तस्य हयादेरादिर्वा ॥

हलीषा । लाङ्गलीषा ॥

17. A word ending in ईषा and beginning with a consonant, may optionally have acute on the first syllable. As हलीषा, लाङ्गलीषा ॥

१८ । उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम् ॥

एषामादिरुदात्तः स्यात् ॥

18. The following have acute on the first उशीरः, दाशेरः, कपालः, पलालः शैवाल, श्यामाक, शारीर, शराव, हृदय, हिरण्य, अरण्य, अपत्य, देवर ॥

१९ । महिष्याषाढयोर्जायेष्टकाख्या चेत् ॥

आदिरुदात्तः । महिषी जाया । आषाढा उपदधाति ॥

इति फिट्सूत्रेषु तृतीयः पादः ॥

19. The word महिषी when meaning 'queen,' and आषाढा when it is the name of a sacrifice are first acute. As महिषी जाया । आषाढा उपदधाति ॥

## CHAPTER IV.

१ । शकटिशकट्योरक्षरमक्षरं पर्यायेण ॥

उदात्तम् । शकटिः । शकटी ॥

1. Every syllable of the words शकटि and शकटी is acute by turns. Thus शकटिः, शकटिः, शकटिः । शकटीः, शकटीः and शकटीः ॥

२ । गोष्ठजस्य ब्राह्मणनामधेयस्य ॥

अक्षरमक्षरं पर्यायेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ॥

2. So also the word गोष्ठज, when it is the name of a Brâhmaṇa. As गोष्ठजः, गोष्ठजः or गोष्ठजो ब्राह्मणः । Otherwise it will be always end-acute by कृदुत्तरपदप्रकृतिस्वर (VI. 2. 139), as गोष्ठजः पशुः ॥

३ । पारावतस्योपोत्तमवर्जम् ॥

शेषं क्रमेणोदात्तम् । पारावतः ॥

3. So also the word पारावत, with the exception of its penultimate syllable. As पारावतः, पारावतः and पारावतः । But the penultimate syllable व is never acute.

४ । धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम् ॥

एषां चतुर्णां धूप्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥

4. So also the words धूम्रजानु with the exception of धू, मुञ्जकेश with the exception of ज, कालवाल with the exception of ल, and स्थालीपाक with the exception of स्था get acute in turn on every syllable. Thus धूम्रजानुः, धूम्रजानुः, धूम्रजानुः ।

मुं॑ञ्जकेशः, मुञ्जकें॑शः, मुञ्जकेश॑ः । कॉलवालः, कालवाॅलः । स्थालीपाॅकः, स्थाॅलीपाकः or स्थालीपाकः ॥

५ । कपिकेशहरिकेशयोश्छन्दसि ॥

कपिकेशः । हरिकेशः ॥

5. In the Chhandas, the words कपिकेश and हरिकेश get acute on every syllable in turn. As कॅपिकेशः, कपिॅकेशः, कपिकेॅशः, कपिकेशॅः । So also with हरिकेशः ॥

६ । न्यङ्स्वरौ स्वरितौ ॥

स्वश्वम् । न्यङ्गुत्तानः । 'व्यचक्षयत्स्वः' ॥

6. The words न्यङ् and स्वर् have svarita accent. As न्य॑ङुत्तानः। व्यचक्षयत स्वः (Rig Veda II. 24. 3).

७ । न्यर्बुदव्यल्कशयोरादिः ॥

स्वरितः स्यात् ॥

7. The first syllables of न्यर्बुद and व्य॑ल्कश are svarita.

८ । तिल्यशिक्यमर्त्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः ॥

स्वरितः स्यात् । तिलानां भवनं क्षेत्रं तिल्यम् । शैक्यानर्यां शिक्यमादत्ते । प्रभिचायमत्यमन्यास्यति । वज्रः काश्मर्यो वज्रो वा । 'यतोनावः' (३७०१) इति प्राप्ते ॥

8. The finals of the following words are svarita; तिल्यं, शिक्य॑, मर्त्यं, काश्मर्यं धान्यं, कन्यां, राजन्यं, मनुष्यं । The word तिल्यम्=तिलानां भवनं क्षेत्रं । शैक्यानर्यां शिक्यमादत्ते, प्रभिचायमत्यमन्यास्यति, वज्रः काश्मर्यो वज्रो वा । Some of these are exceptions to VI. 1. 213.

९ । बिल्वभक्ष्यवीर्याणि छन्दसि ॥

अन्तस्वरितानि । ततो बिल्व उदतिष्ठत् ॥

9. In the Chhandas the following words are finally svarita : बिल्व॑, भक्ष्य॑, वीर्य॑ । As ततो बिल्व उदतिष्ठत् ॥

१० । त्वत्वसमसिमेत्यनुच्चानि ॥

स्तरीरु त्वत् । 'उत त्वः पश्यन्' । 'नभन्तामन्यके समे' । 'सिमस्मै' ॥

10. The words त्वत्, त्व, सम, and सिम are wholly anudâtta. As स्तरीरु त्व (Rig Veda VII. 101 3), उत त्वः पश्यन् (Rig Veda X. 71. 4), नभन्ताम न्यके समे (Rig Veda VIII. 39. 1), सिमस्मै (Rig Veda I. 115. 4).

११ । सिमस्याथर्वणेऽन्त उदात्तः ॥

अथर्वण इति प्रायिकम् । तत्र दृष्टस्येतरत्रापि दर्शनात् । तेन 'वाससनुते सिमस्मै' इत्यृग्वेदेऽपि भवत्येव ॥

11. In the Atharva Veda the word सिम is finally acute. The rule is not confined to the Atharva Veda : it is so found in the Rig Veda also. As वाससनुते सिमस्मै (Rig Veda I. 115. 4).

१२ । निपाता आद्युदात्ताः ॥

स्वाहा ।

12. The Indeclinables are first acute. As स्वाहा ॥

१३ । उपसर्गाश्चाभिवर्जम् ॥

13. The upasargas are first-acute with the exception of अभि ॥

१४ । एवादीनामन्तः ॥

एवमादीनामिति पाठान्तरम् । एव । एवम् । नूनम् । 'सह ते पुत्र सूरिभिः' । षष्टस्य तृतीये सह । 'सहस्य सः–' (१००९) इति प्रकरणे सहशब्द आद्युदात्त इति तु प्राञ्चः । तच्चिन्त्यम् ॥

14. The words एव and the rest are finally acute. Another reading is एवमादीनाम् । As एव, एवम्, नूनम्, सह । सह ते पुत्र सूरिभिः । In VI 3. 78 S. 1009, the word सह is first-acute according to Kâśikâ. Thus there is an apparent contradiction.

१५ । वाचादीनामुभावुदात्तौ ॥

उभौ ग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय ॥

15. Both syllables of the words वाच and the rest are acute. This debars the general rule by which, in one word only one syllable is accented. (VI. 1. 158).

१६ । चादयोऽनुदात्ताः ॥

स्पष्टम् ॥

16. The words च and the rest are anudâtta.

१७ । यथेति पादान्ते ॥

'तं मे मिमृ भवो यथा' । 'पादान्ते' किम् । 'यथा नो अदितिः करत्' ॥

17. The word यथा is anudâtta at the end of a Pâda or verse. As त मे मिमृभवो यथा (Rig Veda VIII. 75. 5). But यथा नो अदितिः करत् where it is not at the end of a verse (Rig Veda I. 43. 2).

१८ । प्रकारादिद्विरुक्तौ ॥

परस्यान्त उदात्तः । पटुपटुः ॥

18. A double-word is finally acute when it denotes प्रकार &c. Thus पटुपटुः This would have been finally acute by Pâṇini's rule also; VIII. 1. 11 and 12.

१९ । शेषं सर्वमनुदात्तं ॥

'शेषं सर्वमनुदात्तम्' । शेषमित्यादिद्विरुक्तस्य परमित्यर्थः । प्रप्रायम् । दिवेदिवे । इति ॥

इति फिट्सूत्रेषु तुरीयः पादः ॥

19. All other double-words are anudâtta. As प्रप्रायम्, (Rig Veda VII. 8. 4) दिवे दिवे (Rig Veda I. 1. 3). ॥

*Here end the Phit Sutras.*

# अथ प्रत्ययस्वराः ।

## CHAPTER III.

### AFFIX-ACCENTS—(continued).

**३७०८ । आद्युदात्तश्च । ३ । १ । ३ ॥**

प्रत्यय आद्युदात्तः स्यात् । अग्निः । कर्तव्यम् ॥

3708. That which is called an affix, has an acute accent on its first syllable.

This sûtra may also be treated as a Paribhâshâ or an Adhikâra sûtra. The udâtta accent falls on the affix, and if it consists of more than one vowel, then on the first of the vowels. Thus the affix तव्य has udâtta on the first त, as in कर्त॑व्यम् । So also अग्निः formed with the affix नि (Uṇâdi IV. 50),

**३७०९ । अनुदात्तौ सुप्पितौ । ३ । १ । ४ ॥**

पूर्वस्यापवादः । यज्ञस्य । न यो युच्छति । शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ ॥

3709. The case-affixes (sup) and the affixes having an indicatory *pa* (pit) are anudâtta.

This is an exception (apavâda) to the last aphorism. As यज्ञस्य, so also न यो युच्छति (Rig Veda V. 54. 13).

Here the root युच्छ प्रमादे is end-acute by VI. 1. 162. To it is added शप् which becomes svarita, as it is preceded by an udâtta (VIII. 4. 66). Then is added तिप् which becomes monotone by I. 2. 39. S 3668, as it is preceded by a svarita. So the affix तिप् becomes monotone.

**३७१० । चितः । ६ । १ । १६३ ॥**

अन्त उदात्तः स्यात् । "चितः सप्रकृतेर्बह्वकजर्थम्" । चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः । 'नभन्तामन्यके समे' । 'यके सरस्वतीमनु' । तकत्सु ते ॥

3710. A stem (formed by an affix or augment or substitute) having an indicatory 'ch', gets acute on the end syllable.

*Vârt:*—In the cases of affixes having an indicatory च्, the acute accent falls on the final, taking the stem and the affix in an aggregate for the sake of affixes 'bahu' and 'akach'. Thus बहुपटुः । The affix बहुच् is one of those few affixes which are really prefixes, (V. 3. 68). The accent will not, therefore, fall on ब, but on the last syllable of the whole word compounded of the prefix and the base. So also with the affix अकच् । It is added in the *middle* of the word, but the accent will fall on the *end*; as उच्चकैः (V. 3. 71).

Thus:—नभन्तामन्यके समे (Rig Veda VIII. 39. 1). यके सरस्वतीम् (Rig Veda VIII. 21. 18). तकत्सु ते (Rig Veda I. 133. 4).

**३७११ । तद्धितस्य । ६ । १ । १६४ ॥**

चितस्तद्धितस्यान्त उदात्तः । पूर्वेण सिद्धे जित्स्वरबाधनार्थमिदम् । कौञ्जायनाः ॥

3711. A stem formed with a Taddhita-affix having an indicatory *ch*, has acute on the end syllable.

Thus कौञ्जायनाः formed by the affix च्फञ् (IV. 1. 98). कुञ्ज + च्फञ् + अय = कौञ्जायन्यः, dual कौञ्जायन्यौ, pl. कौञ्जायनाः (ञ्य being elided by II. 4. 62, and thus giving scope to च्फञ् accent ). In this affix there are two indicatory letters च and ञ ; the च has only one function, namely, regulating the accent according to this rule, while ञ has two functions, one to regulate the accent by VI. 1. 197, and another to cause Vriddhi by VII. 2. 117. Now arises the question, 'should the word get the accent of च or of ञ' । The present rule declares that it should get the accent of च and not of ञ, for the latter finds still a function left to it, while if ञ was to regulate the accent, च would have no scope.

३७१२ । कितः । ६ । १ । १६५ ॥

कितस्तद्धितस्यान्त उदात्तः । 'यदाग्नेयः' ॥

3712. A stem formed by a Taddhita affix having an indicatory *ka* has acute accent on the end syllable.

Thus यदाग्नेयः । Here the affix ढक् is added to अग्नि by IV. 2. 33 S. 1236.

३७१३ । तिसृभ्यो जसः । ६ । १ । १६६ ॥

जस उदात्तः । 'ति॒स्रो द्याव॑ः सवि॒तुः' ॥

3713. The Nominative plural *jas* of *tisri* has acute accent on the last syllable.

Thus तिस्रो द्यावः सवितुः (Rig Veda I. 35. 6).

The word त्रि is end-acute; the feminine तिसृ being its substitute would also be end-acute. Before the affix जस्, the ऋ is changed to र by VII. 2. 100. Here VIII. 2. 4 would have made the जस् svarita. This debars that svarita accent. Therefore the word तिस्रः in the above example is end-acute.

३७१४ । सावेकाचस्तृतीयादिर्विभक्तिः । ६ । १ । १६८ ॥

साविति सप्तमीबहुवचनम् । तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता । 'वाचा विरूप' । सौ किम्? राजेत्यादौ एकाचोऽपि राजशब्दात्परस्य मा भूत् । 'राज्ञो॒ नु ते॒' । एकाच किम् ? 'विद्युधते राजनि त्वे' । तृतीयादिः किम् ? 'न द॑दर्श वाचम्' ॥

3714. The case-affixes of the Instrumental and of the cases that follow it have the acute accent, if the stem in the Locative Plural is monosyllabic.

The word सौ (locative of सु) refers to the सु of the Locative plural.

Thus वाचा विरूप । Why do we say 'if the stem in the Locative plural is monosyllabic'? Observe राज्ञो॒ नु ते॒ वरु॑णस्य व्र॒तानि॑ बृ॒हद्ग॑भी॒रं तव॑ सोम॒ धाम॑ । (Rig Veda I. 91. 3). because the stem in the Locative Pl. of राजन् is not monosyllabic, but dissyllabic; though here it is monosyllabic. Why do we say 'monosyllable'? Observe विद्युधते राजनि त्वे (Rig Veda VI. 1. 13). Why do say 'the Instrumentals and the rest'? Observe न ददर्श वाचम् (Rig Veda X. 71. 4). The plural of Locative being taken in the sûtra, the rule does not apply to राज्ञा and राजनि ; as in

the *plural* of the Locative they have more than one syllable, though in *singular* locative their stem has one syllable.

**३७१५ । अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे । ६ । १ । १६९ ॥**

नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयादि विभक्तिरन्तोदात्ता वा स्यात् । परमवाचा ॥

3715. The same case endings may optionally have the acute accent, if the monosyllabic word stands at the end of a compound, and has acute accent on the final, when the compound can be easily unloosened.

The phrases 'एकाच', and तृतीयादिर्विभक्तिः are understood here also. The nitya or *invariable* compounds are excluded by this rule. Thus परमवाचा, or परमवाचा, परमवाचे or वाचे; परमवाचः or वाचः । So also परमत्वचा or त्वचा &c.

**३७१६ । अञ्चेश्छन्दस्यसर्वनामस्थानम् । ६ । १ । १७० ॥**

अञ्चेः परा विभक्तिरुदात्ता । 'इन्द्रो दधीचः' । चावित्ति पूर्वपदान्तोदात्तत्वं प्राप्तं तृतीयादिरित्यनुवृत्ते मानेऽसर्वनामस्थानग्रहणं शस्परिग्रहार्थम् । 'प्रतीचो बाहून्' ॥

3716. In the Chhandas, the case-endings other than the sarvanâmasthâna, get the acute accent when coming after añch.

In the Vedas, a stem ending in the word अञ्च्, has the acute not only on the affixes previously mentioned, but on the accusative plural affix also. Thus इन्द्रो दधीचो अस्थभिः (Rig Veda I 84. 13). Here the word दधीच् had accent on धी by VI. 1. 222, but by the present sûtra, the accent falls on the case-affix अस् ॥

Though the anuvritti of 'Instrumentals and the rest' was understood here, the word asarvanâmasthâna has been used here to include the ending शस् also. As प्रतीचो बाहून् प्रतिभङ्ध्येषाम् (Rig Veda X. 87. 4).

**३७१७ । ऊडिदंपदाद्यप्पुम्रैद्युभ्यः । ६ । १ । १७१ ॥**

'ऊठ्' 'इदं' 'पदादि' 'अप्' 'पुम्' 'रै' 'दिव्' इत्येभ्योऽसर्वनामस्थानविभक्तिरुदात्ता । ऊठ् । प्रष्ठौहः । प्रष्ठौहा ॥

'* ऊठ्युपधाग्रहणं कर्तव्यम् *' । इह मा भूत् । अक्षद्युवा' । 'अक्षद्युवे' । इदम् । 'एभिर्नृभिर्नृतमः' । अन्वादेशे न । 'अन्तोदात्तात्' इत्यनुवृत्तेः । न च तत्रान्तोदात्ततास्तीति वाच्यम् । 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' (३५०) इति सूत्रेणानुदात्तस्यादेशविधानात् । 'प्र ते बभ्रू' । 'आभ्यां गा अनु' । 'पद्दन्नोमास्हृन्निश्–' (२२८) इति पदादयः । 'पद्भ्यां भूमिः' । 'दद्भिर्न जिह्वा' । 'आ यन्ते मासिमासि' । 'अमैर्विचन्म हृदा' । अप् । 'अपां फेनेन' । पुम् । 'अभ्रातेव पुंसः' । रै । 'राया वयम्' । 'रायो धर्ता' । दिव् । 'दिवेदिवे' ॥

3717. The same (asarvanâmasthâna) case-endings have the acute accent, when the stem ends in 'vâh'; also after *idam*, after *pad* &c. (upto 'nis' VI. 1. 63) after *apa, puns, rai* and *div*.

Thus: (1.) ऊठ् :—प्रष्ठौहः, प्रष्ठौहा ॥

*Vârt*:—In the case of ऊठ् the penultimate ऊ should be taken. Therefore not here: अक्षद्युवा, अक्षद्युवे ॥

(2) इदम्—एभिर्नृभिर्नृतमः (Rig Veda IV. 17. 11).

Not so in ânvâdeśâ (II. 4. 32 S. 350), because the anuvritti of अन्तोदात्तात् is understood in this sûtra. Nor should it be said that there is final udâtta in the case of ânvâdeśa इदम् also. Because in ânvâdeśa the अश् substitute of इदम् is expressly taught to be anudâtta by II. 4. 32, and it can never be end-acute. Thus in the following Rik verse (Rig Veda IV. 32. 22):—प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् । माभ्यां गा अनु शिश्रथः ॥

Here आभ्यां is used as अन्वादेश referring to बभ्रू of the preceding line.

(3) पद &c. These are the six words पद्, दत्, नस्, मास्, हृद् and निश् (VI. 1. 63, S. 228). Thus पद्भ्यां भूमिः । दद्भिर्न जिह्वा (Rig Veda X. 68. 6). जायते मासि मासि (Rig Veda X. 52. 3). मनश्चिदस्मै हृद आ (Rig Veda I. 24. 12).

(4) अप्:—as अपां फेनेन (Rig Veda VIII. 14. 13).

(5) पुंस्:—as अभ्रातेव पुंसः (Rig Veda I. 124. 7).

(6) रै—as राया वयम् (Rig Veda IV. 42. 10). रायो धर्ता (Rig Veda V. 15. 1).

(7) दिव्—as दिवे दिवे (Rig Veda I. 1. 3).

३७१८ । अष्टनो दीर्घात् । ६ । १ । १७२ ॥

असर्वनामस्थानविभक्तिरुदात्ता । 'अष्टाभिर्दशभिः' ॥

3718. The asarvanâmasthâna case-endings after 'ashṭan' 'eight' have acute accent, when it gets the form 'ashṭâ.'

The word अष्टन् has two forms in the Acc. pl. and the other cases that follow it, namely अष्टा and अष्ट । The affixes of Acc. pl. &c., are udâtta after the long form अष्टा and not after अष्ट । Thus अष्टाभिः (Rig Veda II. 18. 4) opposed to अष्टभिः, अष्टाभ्यः con. अष्टभ्यः, अष्टासु con. अष्टसु । The word अष्टन् has acute on the last syllable, as it belongs to the class of धृतादि words (Phit I. 21); and by VI. 1. 180 the accent would have been on the penultimate syllable. This rule debars it.

३७१९ । शतुरनुमो नद्यजादी । ६ । १ । १७३ ॥

अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिविभक्तिरुदात्ता स्यात् । 'अच्छा रवं प्रथमा जानती' । कुर्वते । 'अन्तोदात्तात्' किम् । दधती । 'अभ्यस्तानामादिः' (३६७३) इत्याद्युदात्तः । 'अनुमः' किम् । तुदन्ती । एकादेशोऽत्र उदात्तः । अदुपदेशात्परत्वाच्छतुः '—लसार्वधातुकम्—' (३७०१) इति निघातः ॥

3719. After an oxytone Participle in *at* the feminine suffix 'î' (nadi) and the case endings beginning with vowels (with the exception of strong cases) have acute accent, when the participal affix has not the augment *n* (*i. e* is not *ant*).

The word अन्तोदात्तात् 'after an oxytoned word' is understood here. Thus अच्छा रवं प्रथमा जानती (Rig Veda III. 31. 6). So also कुर्वते (III. 2. 80 S. 2990).

If the participle is not an oxytone, the rule does not apply. As दधती, दधतो । Here the accent is on the first syllable by VI. 1. 189. S. 3673. Why do we say 'not having the augment नुम्?' Observe तुदन्ती । Here also by VI.

1. 186. S. 3730, after the root तुद् which has an indicatory श, in the Dhâtupâṭha being written तुद, the sârvadhâtuka affix शतृ (अत्) is anudâtta. This anudâtta अत्, coalescing with the udâtta अ of तुद (VI. I. 162), becomes udâtta (VIII. 2. 5); and VIII. 2. 1 not being held applicable here, the Participle gets the accent, and not the feminine affix.

३७२० । उदात्तयणो हल्पूर्वात् । ६ । १ । १७४ ॥

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी असर्वनामस्थानविभक्तिश्च उदात्ता स्यात् । 'चोदयित्री सूनृतानाम्' । 'एषा नेत्री' । ऋतं देवाय कृण्वते सवित्रे ॥

3720. The same endings have the acute accent, when for the acutely accented final vowel of the stem, a semi-vowel is substituted, and which is preceded by a consonant.

Thus चोदयित्री सूनृतानाम् (Rig Veda I. 3. 11), एषा नेत्री (Rig Veda VII. 76. 7) ऋतं देवाय कृण्वते सवित्रे (Rig Veda II. 30. 1). All these are तृच् ending words and have consequently acute accent on the final (VI. 1. 163).

३७२१ । नोङ्धात्वोः । ६ । १ । १७५ ॥

अनयोर्यणः परे असर्वनामस्थानविभक्तिरुदात्ता न स्युः । ब्रह्मबन्ध्वा । 'सेत्पृश्निः सुभ्वे' ॥

3721. But not so, when the vowel is of the feminine affix 'ū' (IV. 1. 66), or the final of a root.

After the semi-vowel substitutes of the udâtta ऊ (IV. 1. 66) or of the udâtta final vowels of the root, when preceded by a consonant, the weak case-endings beginning with a vowel do not take the acute accent. Thus ब्रह्मबन्ध्वा ब्रह्मबन्ध्वे. धीरबन्ध्वा, धीरबन्ध्वे from धीरबन्धू, which has acute accent on ऊ, because ऊङ् is udâtta (III. 1. 3), and the ekâdeśa of it, when it combines with the preceding vowel is also udâtta (VIII. 2. 5). The व substituted for ऊ before the ending आ, is a semi-vowel substitute of an udâtta (उदात्तयण्); the affix after it would have become udâtta by the last sûtra, but not being so, the general rule VIII 2. 4 applies and makes it svarita. Let us take an example of a semi-vowel substitute of the vowel of a root (धातु-यण्)—सकलप्वा; सकलप्वे and खलप्वा, खलप्वे from सकलपू and खलपू respectively formed by क्विप् affix, the second member of the compound retaining its original accent, namely, the oxytone. the semi-vowel being substituted by VI. 4. 83. before the vowel case-endings. So also सेत्पृश्निः सुभ्वे (Rig Veda VI. 66. 3).

३७२२ । ह्रस्वनुड्भ्यां मतुप् । ६ । १ । १७६ ॥

ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबुदात्तः । 'यो अब्दिमाँ उदनिमाँ इयर्ति' । नुटः । 'अक्षण्वन्तः कर्णवन्तः सखायः' । 'अन्तोदात्तात्' किम् ? 'मा त्वा विदद्विषुमान्' ॥

'+ स्वरविधौ व्यञ्जनमविद्यमानवत् +' इत्येतदत्र नेष्यते । 'मरुत्वाँ इन्द्र' । 'विद्युत्वान्त्वा युधामंहि' ॥

'+ रेशब्दाच्च +' । 'रेवाँ इद्रेवतः' ॥

3722. The otherwise unaccented *mat* (*vat*) takes the acute accent, when an oxytoneđ stem ends in a light vowel, or the affix has before it the augment *n* (V.II. 2. 16).

The word अन्तोदात्तात् is understood here also. Thus

ये ते ज्योतिष्मन्तो... (Rig Veda V. 42. 14). So also when मतुप् takes नुट्, as अक्षण्वन्तः कर्णवन्तः सखायः (Rig Veda X. 71. 7). Here by VII. 1. 76, the word अक्षि takes अनङ् and becomes अक्षन्, then is added नुट् by VIII. 2. 16, and we have अक्षन् न् मतुप्। The preceding न् is elided. When the stem is not oxytone (antodâtta) this rule does not apply: as वसुमान्। मात्या चित्रिवसुमान् (Rig Veda II. 42. 2). The word वसु has acute on the first syllable, as it is formed from वस् with the affix उ (Uṇ 1. 10) which is नित् (Un I. 9). So the मतुप् retains its anudâtta here. So also in the case of मरुत्वान्, the affix does not become acute, though the word मरुत् has acute on the final as the intervening त् makes the उ of रु *heavy* when the affix is added: the general maxim स्वरविधौ व्यञ्जनमविद्यमानवत् does not apply here, because the very fact that न् is only taken as an exception, shows this, as मरुत्वां इन्द्र (Rig Veda III. 47. 1) नियुत्वानया वायवायाहि (Rig Veda II. 41. 2).

*Vârt*:—The affix मतुप् becomes acute after the heavy vowel of रै; as आरेवान = रयिरस्यास्ति। There is vocalisation of य of रयि, as र इ इ, then substitution of one, as र इ, then guṇa, as रे in रेवान् वृद्धवतः (Rig Veda VIII. 2. 13).

३७२३। नामन्यतरस्याम्। ६। १। १७७॥

मतुपि योह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा। 'चेतन्ती सुमतीनाम्'॥

3723. After an oxytoned stem which ends in a light vowel the genitive ending 'nâm' has optionally the acute accent.

Thus:—चेतन्ती सुमतीनाम् (Rig Veda I. 3. 11).

So also अग्नीनाम् or अग्नीनाम्, वायूनाम्, or वायूनाम् कर्तॄणाम् or कर्तॄणाम् (see VII. 1. 54).

३७२४। ङ्याश्छन्दसि बहुलम्। ६। १। १७८॥

ङ्याः परो नामुदात्तो वा। 'देवसेनानामभिभञ्जतीनाम्'। जयन्तीनाम्। 'अयन्तीनां मरुतो मृत्'॥

3724. In the Chhandas, the ending 'nâm' has diversely the acute accent after the feminine affix 'î.'

Thus देवसेनानाम् अभिभञ्जतीनाम्, (Rig Veda X. 103. 8). Sometimes it does not take place, as जयन्तीनाम् मरुतः (Rig Veda X. 103. 8).

३७२५। षट्त्रिचतुर्भ्यो हलादिः। ६। १। १७९॥

एभ्यो हलादिर्विभक्तिरुदात्ता। 'आ षड्भिर्हूयमानः'। 'त्रिभिष्ट्वं देव'॥

3725. The case-endings beginning with a consonant, have the acute accent after the Numerals called *shaṭ* (I. 1. 24), as well as after *tri* and *chatur*.

The anuvritti of अन्तोदात्तात् ceases: for the present rule applies even to words like पञ्चन् and सप्तन् which are acute on the initial by Phit II. 5. Thus षण्णाम् षड्भिः, षड्भ्यः, पञ्चानाम्, सप्तानाम्, त्रिभिः, त्रिभ्यः, त्रयाणाम्, चतुर्णाम् (See VII. 1. 55) Why do we say 'before case-affixes beginning with consonants'? Observe चतस्रः

यस्य (VI. 1. 167 and VII. 2. 99). आ चत्वारिंशद्‌ वयमानः (Rig Veda II. 18, 4). चित्रिः त्वं देव मरुतः (Rig Veda IX. 67. 26).

**३७२६ । न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः । ६ । १ । १८२ ॥**

एभ्यः प्रागुक्तं न । 'गवां' शता' । 'गोभ्यो' गातुम्' । 'शुन'श्चि-च्छेप'म्' । सौ प्रथमैकवचनेऽवर्णान्तात् । 'तेभ्यो' द्यु_म्नम्' । तेषां पाहि श्रु_धी हव'म् ॥

3726. The foregoing rules from VI. 1. 168 downwards have no applicability after *go*, and 'śvan' and words ending in them; nor after a stem which before the case ending of the Nominative singular has *a* or â, nor after 'râj,' nor after a stem ending in *anch*, nor after *krunch* and *krit*.

Thus गवा, गवे, गोभ्याम् as in गवां शता (Rig Veda I. 122 7). Here by VI. 1. 168, the case-endings would have got otherwise the accent, which is however prohibited. So also सुगुना, सुगवे and सुगुभ्याम् । गोभ्यो गातुम (Rig Veda VIII. 45, 30) Here VI 1. 169 is prohibited. So also शुना, शुने, श्वभ्याम्, परमशुना, परमशुने and परमश्वभ्याम् । शुनश्चिच्छेपम् (Rig Veda V. 2. 7). The word सावर्णः (सौ अवर्णः) means 'what has अ or आ before सु (1st sing.)' Thus येभ्यः, तेभ्यः, केभ्यः । तेभ्योद्युम्नम् (Rig Veda V.79. 7). तेषां पाहि श्रुधी हवम् (Rig Veda I. 2. 1). So also राजा, राज्ञे, परमराजा । The word राज् is formed by क्विप् affix. अङ् - अञ्च + क्विन् ; the prohibition applies to that form of this word wherein the nasal is not elided (VI. 4. 30). Thus प्राञ्चा, प्राङ्भ्याम् । Where the nasal is elided, there the case ending must take the accent; as प्राचा प्राग्भ्याम् । क्रुङ् is also a क्विन् formed word. Thus क्रुञ्चा, क्रुञ्चे, परमक्रुञ्चा । कृत् is derived from कृ 'to do' or from कृत् 'to cut' by क्विप्; as कृता, कृते and परमकृता । Why has the word श्वन् been especially mentioned in this sûtra, when the rule would have applied to it even without such enumeration, because in the Nominative Singular this word assumes the form श्वा and consequently it is सावर्णः? The inclusion of श्वन् indicates that the elision of न should not be considered asiddha for the purposes of this rule. Therefore, the present rule will not apply to words like नृ and पितृ which in Nom. Sing. end in आ as ना and पिता after the elision of न् of अनङ् (VII. 3. 94). Thus the Locative Singular of नृ will be नरि by VI 1. 168 ; this prohibition not applying, and the affix मतुप् will get udâtta after पितृ by VI. 1. 176 as पितृमान् । But rule VI. I. 176 will be debarred by the present in the case of वृक्षवान्, because वृक्ष is a सावर्ण ॥

**३७२७ । दिवो झल् । ६ । १ । १८३ ॥**

दिवः परा झलादिर्विभक्तिर्नोदात्ता । 'द्युभिरक्तुभिः' । 'झल्' इति किम् । 'उप' त्वाग्ने दिवेदिवे' ॥

3727. After *div* a case-ending beginning with *bha* or *sa* is unaccented.

Thus द्युभ्याम्, द्युभिः रक्तुभिः (Rig Veda I. 34. 8). This debars VI. 1. 168, 171. Why do we say 'beginning with a झल् consonant'? Observe उपत्वाग्ने दिवेदिवे Rig Veda I. 1 7).

३७२८ । नृ चान्यतरस्याम् । ६ । १ । १८४ ॥
नुः परा झलादिर्विभक्तिर्वोदात्ता । 'नृभिर्येमानः' ॥

3728. After *nri*, a case ending beginning with *bha* or *sa* is optionally unaccented.

Thus नृभिः or नृभिः, नृभ्यः, नृभ्यः, नृभ्याम्, नृभ्याम्, नृषु, नृषु । नृभिर्येमानः (Rig Veda IX. 75, 3). But not so नरा, नरे ॥

३७२९ । तित्स्वरितम् । ६ । १ । १८५ ॥
निगदव्याख्यातम् । 'क्व नूनम्' ॥

3729. An affix having an indicatory *t*, is svarita *i. e.*, has circumflex accent.

Thus चिकीर्ष्यम्, जिहीर्ष्यम्, formed by यत् (III. 1. 97). कार्यम्, हार्यम् with ण्यत् (III. 1. 124). This is an exception to III. 1, 3 which makes all affixes âdyudâtta. For exception to this rule see VI. 1, 213 &c. क्व नूनम् (Rig Veda I. 38. 2).

३७३० । तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः । ६ । १ । १८६ ॥
अस्मात्परं लसार्वधातुकमनुदात्तं स्यात् । तासि । कर्ता । कर्तारौ । कर्तारः । प्रत्ययस्वरापवादोऽयम् । अनुदात्तेत् । य आस्ते । ङितः । 'अभि चष्टे अनृतेभिः' । अदुपदेशात् । 'पुरुभुजा चनस्यतम्' । चित्स्वरोऽप्यनेन बाध्यते । 'वर्धमानं स्वे दमे' । 'तास्यादिभ्यः' किम् । 'अभि वृधे गृणीतः' । उपदेशग्रहणादेह । 'हतो वृत्राण्यार्या' । 'लसार्वधातुकम्' किम् । 'कर्तेह निघ्नाना' । 'सार्वधातुकम्' किम् । शिश्ये । 'अह्न्विङोः' किम् । ह्नुते । यदधीते । '+ विदीन्धिखिदिभ्यो नेति वक्तव्यम् +' । 'इन्धे राजा' । एतच्च 'अनुदात्तस्य च यत्र-' (३६५१) इति सूत्रे भाष्ये स्थितम् ॥

3730. The Personal-endings and their substitutes (III. 2. 124-126) are, when they are sârvadhâtuka (III. 4. 113 &c), unaccented, after the characteristic of the Periphrastic future 'tâsi' after a root which in the Dhâtupâtha has an unaccented vowel or a 'ṅ' (with the exception of 'hnuṅ' and 'iṅ') as indicatory letter, as well as after what has a final 'a' in the Grammatical system of Instruction (upadeśa).

Thus तासिः, कर्ता,—कर्तारौ, कर्तारः, this debars the affix accent (III. 1. 3). Anudâttet;—as, आस—आस्ते, वस—वस्ते । ङितः—षूङ्—सूते, शीङ्—शेते ; अभिचष्टे अनृतेभिः (Rig Veda VII. 104. 8). अत् उपदेशः:—as तुदतः, नुदतः, पचतः, पठतः । पुरुभुजा चनस्यतम् (Rig Veda I. 3 1). A root taking शप् (अ) is considered as taught (upadeśa) as if ending with an अ, as the indicatory letters श् and प् are disregarded on the maxim अनुबन्धस्यानेकान्तिकत्वं (= अनवयवत्वं) । Thus पचमानः, यजमानः । The augment मुक् is added by आने मुक् VII. 2. 82 which may be explained in two ways; *first*, the augment मुक् is added to the final अ of the base (aṅga) when आन (शानच् &c.) follows; or *secondly*, the augment मुक् is added to the base (aṅga) which ends in अ, when आन follows. In the first case मुक् becomes part and parcel of अ, and therefore अदुपदेश will mean and include अ having such मुक्, on the maxim यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते 'That

to which an augment is added denotes, because the augment forms part of it not merely itself, but it denotes also whatever results from its combination with that augment.' Therefore मुक् will not prevent the verb becoming अनुपदेश। But if secondly मुक् be taken as part of the *base* which ends in म, then the सार्वधातुक does not follow an अनुपदेश, because म intervenes. But we get rid of this difficulty by considering मुक् augment as Bahiranga and therefore asiddha when the Antaranga operation of accent is to be performed. The augment मुक्, (म्) in the last two examples consequently does not prevent the application of the rule. Though the affix शानच् has an indicatory च, yet चित् accent (VI. 1. 163) is debarred by this rule, as it is *subsequent*. As वर्धमानं स्वे दमे (Rig Veda I. 1. 8).

Why do we say after शासि &c. Observe वर्धिनुषे सुवीत: (Rig Veda III 6. 10) चित्रनि: । The vikarana श्नु is ङित् (I. 2. 4) with regard to operations affecting the prior term, and not those which affect the subsequent. Therefore though श्नु is considered as ङित् for the purposes of preventing the guna of the prior term चि, it will not be considered so for the purposes of subsequent accent. Or the word ङित् in this sûtra may be taken as equal to ङिदुपदेश and not the आतिदेशिक ङित् like श्नु । Why do we use the word upadeśa ? So that the rule may apply to पँचावः, पचामः, but not to इतः, घ्नः the dual of हन् which ends in न् in upadeśa, though before तस् and थस् it has assumed the form ह। Therefore ह तः, ह थः । हतोवृत्राण्यर्या (Rig Veda VI. 60. 6). Why do we use the word ल (Personal endings) ? Observe कतीह निघ्राना formed by चानश् added to हन् (III. 2. 128), which not being a substitute of लट्, is not a personal ending like शानच् । Why do we use the word Sârvadâtuka ? Observe शिश्ये, शिश्याते शिश्यिरे । Why do we say with the exception of हनुङ् and वद् ? Observe हुनुते, यद् वधीते ॥

*Vārtika* :—Prohibition must be stated of विद्, ऐन्ध, and विष् । Thus इन्धे राजा (Rig Veda VII. 8. 1).

This is explained in the Mahâbhâshya on sûtra VI. 1. 161. S. 3651.

३७३१ । आदि: सिचोऽन्यतरस्याम् । ६ । १ । १८७ ॥

सिजन्तस्यादिरुदात्तो वा । 'यासिष्टं वर्तिरश्विना ॥

3731. In 'sich' Aorist, the first syllable may optionally have the acute accent.

The word उदात्त is understood here. Thus, मा हि लाविष्टम्, मा हि कार्ष्टम् ; मा हि लाविष्टाम or मा हि लाविष्टाम् ॥ So also यासिष्टं वर्तिरश्विना (Rig Veda VII. 40. 5 and VII. 67. 10).

३७३२ । थलि च सेटीडन्तो वा । ६ । १ । १९६ ॥

सेटि थलन्ते पदे इडुदात्तः अन्तो वा आदिर्वा स्यात् । यदा नैते तदा 'लिति' (३६७४) इति प्रत्ययात्पूर्वमुदात्तम् । लुलविथ । अत्र यस्मिरोऽपि पर्यायेणोदात्ताः ॥

3732 Before the ending *tha* of the Perfect, second person singular, when this ending takes the augment *i*, the acute accent falls either on the first syllable, or on this *i*, or on the personal ending.

Thus शुचिर्वित्त, शुचर्वित्त, शुचर्वित्त, and शुचर्वित्त । As यक् has an indicatory क् the syllable preceding the affix may have also the accent (VI. 1. 193). Thus we get the four forms given above. In short, with यक् termination, the accent may fall on any syllable. When the य is not सेट्, the accent falls on the root and we have one form only by लिट् accent (VI. 1. 193 S. 3676) :—चक्रित ॥

३७३३ । उपोत्तमं रिति । ६ । १ । २१७ ॥

रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात् । 'यदाहवनीये' ॥

इति प्रत्ययस्वराः ॥

3733. What is formed by an affix having an indicatory *ra* has acute on the penultimate syllable, the full word consisting of more than two syllables.

A penultimate syllable can be only in a word consisting of three syllables or more. Thus करणीयम् and हरणीयम् formed by अनीयर् (III. 1. 96); पटुजातीयः, मृदुजातीयः by जातीयर् (V. 3. 19) यदाहवनीये ॥ This debars III. 1. 3.

*Here end Affix-accents.*

# अथ समासस्वराः ।

## CHAPTER IV.

## ACCENT OF COMPOUNDS.

३७३४ । समासस्य । ६ । १ । २२३ ॥

अन्त उदात्तः स्यात् । 'यज्ञश्रियम्' ॥

3734. A compound word has the acute on the last syllable.

Thus यज्ञ श्रियं (Rig Veda I. 4. 7). The consonants being held to be non-existent for the purposes of accent; the udâtta will fall on the vowel though it may not be final, the final being a consonant.

३७३५ । बहुव्रीहौ प्रकृत्या पूर्वपदम् । ६ । २ । १ ॥

उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात् । 'सत्यचित्रश्रवस्तमः' । 'उदात्त—' इत्यादि किम् । सर्वानुदात्ते पूर्वपदे समासान्तोदात्तत्वमेव यथा स्यात् । समपादः ॥

3735. In a Bahuvrîhi, the first member preserves its own original accent.

The word पूर्वपदम् means here the accent—whether udâtta or svarita—which is in the first member : प्रकृत्या means, 'retains its own nature, does not become modified into an anudâtta accent.' By the last rule the final of a compound gets the accent, so that all the preceding members lose their accent, and become anudâtta, as in one word all syllables are unaccented except one, VI. 1. 158. Thus the first member of a Bahuvrihi would have lost its accent and become anudâtta ; with the present sûtra commences the exceptions to the rule that the final of a compound is always udâtta. Thus सत्यचित्र श्रवस्तमः ॥

The words udâtta, and svarita are understood in this aphorism. Therefore if *all* the syllables of the pûrvapada are anudâtta, the present rule has no scope there, and such a compound will get udâtta on the final by the universal rule enunciated in VI. 1. 223. Thus समभागः, here सम being *all* anudâtta, the accent falls on ग ॥

३७३६ । तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः । ६ । २ । २ ॥

